वि+अव विवादे शयनभोजनादिना संसर्गे उपभोगे च।
आ+भोजने आहारः। नानास्थानस्थितानामेकत्रसङ्कलने च
अधि+आ+तर्के अन्यत्रश्रुतपदस्यान्वयार्थमाकर्षणे च।
अभि+आ+आभिमुख्येनाहरणे।
उद्+आ+दृष्टान्ततयोपन्यासे कथने च।
प्रति+उद्+आ—प्रतिरूपतया उपन्यासे।
परि+आ+परित आहरणे [विषयेभ्यो मनसो निवारणे च
प्रति+आ+तन्त्रेण पठितानामेकैकस्य ग्रहणे प्रत्याहारः
वि+आ—कथने शब्दोत्पादकव्यापारे।
सम्+आ—संग्रहे नानास्थानस्थितानामेकत्रोपन्यासे संघाते च
उद्+उत्तोलने उत्क्षेपणे च।
अभि+उद्+आभिमुख्येन उद्धरणे। अभितो वा उत्क्षेपणे।
प्रति+उद्+प्रतिकूलतया प्रातिकूल्येण वा उद्धरणे।
उप+सामीप्येन आनतीकरणार्थं दाने उपढौकने।
प्रति+उप+प्रतिरूपतया उपढौकने।
नि+नितरां हरणे छिन्नविस्रवणे च।
निस्+(र)बहिष्करणे अपसारणे च।
परि+दोषादिनिवारणे।
प्र+ताडने निघाते।
प्रति+प्र+प्रतिरूपतया ताडने।
प्रति+प्रत्येकहरणे प्रतिरूपतया हरणे च।
वि+देशविशेषेषु गत्यादिना सन्तोषकरणार्थव्यापारे विहारः।
वि+अति परस्परमेकजातीयक्रियाकरणे आ०।
सम्+मारणे ताडने च। [योजने यथा गुल्मोपसंहारः।
उप+सम्+प्रकरणपठितस्य समापने अन्यत्र पठितस्यान्यत्रा

**हृ** बलात्कारहरणे जु०पर०सक० अनिट् वैदिकः। जहर्त्ति अहार्षीत्। [दयस्थिते त्रि०।

**हृच्छय** पु० हृदि शेते शी-अच्। १कामदेवे हला०। २हृ-

**हृच्छूल** न० ६त०। शूलरोगभेदे वैद्यकम्।

**हृणी** लज्जायां कण्ड्वा०आत्म०अक०सेट्। हृणीयते अहृणीयिष्ट "हृणीयते वीरवती न भूमिः" भट्टिः।

**हृणीया** स्त्री हृणीय-भावे अ। निन्दायाम् अमरः।

**हृत्(द्)** त्रि० हृ-क्विप् तुक् च। १हारिणि। पृषो०तस्य दः, हृदयस्य हृदादेशो वा। २हृदये ३मानसे च न० अमरः।

**हृत्कम्प** पु० ६त०। भयादिहेतुके हृदयकम्पे।

**हृत** त्रि० हृ-क्त। १अपहृते २स्थानान्तरं गमिते च ३विभक्ते

**हृदय** न०हृ-कयन् दुक् च।१मनसि २वक्षसि च त्रिका०। हृद् एति इण-अच्। परब्रह्मणि "हृदयं तस्माद्धृदयम्" छा०उ०

**हृदयग्रन्थि** पु० हृदयस्य ग्रन्थिरिव। अविद्यासम्बन्धरूपे संसारबन्धे "भिद्यते हृदयग्रन्थिः" इति भागवतम्।

**हृदयङ्गम** त्रि० हृदयं गच्छति गम-ख मुम् च।१युक्तियुक्ते २मनोहरे त्रि० अमरः। "हृदयङ्गममूर्त्ति रत्नम्" भट्टिः।

**हृदयस्थान** न०हृदयस्य मनसः स्थानम् हृदयरूपं वा स्थानम् वक्षःस्थले हेमच०। [इनि। हृदयिन् तत्रार्थे जटा०

**हृदयिक** त्रि० हृदयं प्रशस्तं मनोऽस्त्यस्य ठन्। प्रशस्तचित्ते

**हृदयेश** पु० ६त०। १भर्त्तरि २भार्य्यायां स्त्री हेमच०।

**हृदावर्त्त** पु० हृदिस्थ आवर्त्तः। अश्वस्य हृदयस्थे आवर्त्ताकारे रोमावलीभेदे त्रिका०। [हरिवं०३८अ०।

**हृदिक** पु० स्वयम्भोजात्मजे कृतवर्मपितरि यादवभेदे

**हृदिकात्मज** पु० ६त०। कृतवर्मणि यादवे।

**हृदिस्पृश्** त्रि० हृदि हृदये स्पृश्यतेऽसौ कर्मणि क्विन् अलुक्स०। १हृद्ये मनोज्ञे। कर्त्तरि क्विन्। २मर्मस्पृशि दुःखदे च। [क्रमेण तद्देशवासिनि सि० कौ०।

**हृद्गोल** पु०पर्वतभेदे सोऽभिजनोऽस्य छ। हृद्गोलीय पित्रादि-

**हृद्ग्रन्थ** पु० हृद् ग्रथ्नाति ग्रन्थ-अच्। हृद्रोगे राजनि०

**हृद्य** न० हृदि स्पृश्यते मनोज्ञत्वात् हृद्+यत्। १गुडत्वचि (दारचिनि) शब्दर०। २मनोज्ञे त्रि०अमरः। ३वृद्धिनामोषधौ स्त्री। ४वशक्रन्मन्त्रभेदे पु० मेदि०।

**हृद्यगन्ध** न०हृद्यो गन्धोऽस्य। क्षुद्रजीरके हेमच०। २बिल्ववृक्षे पु० जटा०। ३जात्यां स्त्री राजनि०। इत्वमा०। हृद्यगन्धीत्यपि ४क्षुद्रजीरके न० राजनि०।

**हृद्रोग** पु० ६त०। हृदयस्य रोगभेदे हृदामयोऽप्यत्र।
भावप्र० तस्य निदानादि तल्लक्षणं चोक्तं यथा "हृद्रोगस्य विप्रकृष्टनिदानमाह "अत्युष्णगुर्वम्लकषायतिक्तश्रमाभिघाताध्यशनप्रसङ्गैः। सञ्चिन्तनैर्वेगविधारणैश्च हृदामयः पञ्चविधः प्रदिष्टः"। प्रसङ्गः सततं सेवा। सञ्चिन्तनम् अतिचिन्ता राजभयादिजनितेति। हृदामयः स च पञ्चविधः वातिकः पैत्तिकः श्लैष्मिकः सान्निपातिकः क्रिमिजश्चेति। तस्य संप्राप्तिपूर्वकं लक्षणमाह। "दूषयित्वा रसं दोषा विगुणा हृदयङ्गताः। हृदि बाधां प्रकुर्वन्ति हृद्रोगन्तं प्रचक्षते"। विगुणाः दुष्टाः बाधां दोषभेदेन नानाविधां व्यथाम्। भङ्गवत्पीडामिति गणदासः। वातिकं हृद्रोगमाह "आयम्यते मारुतजे हृदयन्तुद्यते तथा। निर्मथ्यते दीर्य्यते च स्फोट्यते पाट्यतेऽपि वा"। मारुतजे हृद्रोग इति शेषः। आयम्यते व्यथया विस्तार्य्यते इव। तु-